२४

अष्टाध्याय्याः अष्टमः अध्यायः-२

प्रस्तावना

एतावता भवन्तः पूर्वतनपाठेषु वैदिकशब्दरूपाणाम् प्रक्रियाः ज्ञातवन्तः। अस्मिन् पाठे स्वरप्रक्रिया प्रदर्शयिष्यते। ह्रस्वदीर्घप्लुताः इति एते उच्चारणकालज्ञापकाः स्वराः सन्ति। एते तावत् कस्य स्वरवर्णस्य कियत्कालम् यावत् उच्चारणम् उचितमिति ज्ञापयन्ति। अन्तिमे पाठेऽस्मिन् आदौ प्लुतस्वरविषये आलोचना करिष्यते। त्रिमात्रस्तु भवेत्प्लुतः इति पाणिनीयशिक्षावचनात् अस्य प्लुतस्य त्रिमात्रिकः उच्चारणकालः बोद्धव्यः। पाठान्तभागे च सत्व-णत्व-षत्वविषये आलोचना विधास्यते।

उद्देश्यानि

इमं पाठं पठित्वा भवान् -

- कदा प्लुतस्वरो भवति तद् ज्ञास्यति।
- प्लुतस्वरविधायकसूत्राणां परिचयं प्राप्स्यति।
- वेदे कदा विसर्गस्य सकारो भवति तद् ज्ञास्यति।
- वेदे कदा नकारस्य णकारो भवति तद् अवगमिष्यति।
- वेदे कदा सकारस्य षकारो भवति तद् ज्ञास्यति।

२४.१) ये यज्ञकर्मणि॥ (८.२.८८)

सूत्रार्थः - ये इत्येतस्य यज्ञकर्मणि प्लुतः भवति।

सूत्रव्याख्या - विधिसूत्रमिदम्। अनेन सूत्रेण यज्ञकर्मणि ये इत्यस्य प्लुतः विधीयते। अस्मिन् सूत्रे ये इति प्रथमान्तं पदम्। यज्ञकर्मणि इति सप्तम्यन्तं पदम्। कर्मशब्दः क्रियावाची। अतः यज्ञकर्मणि इत्यस्य यज्ञक्रियायाम् इत्यर्थः। यज्ञसम्बन्धिक्रियायाम् इति यावत्। "वाक्यस्य टेः प्लुत उदात्तः" इति सूत्रात् प्लुतः इति पदम् अनुवर्तते। यज्ञकर्मणि ये इत्यस्य प्लुतः भवति इति सूत्रार्थः। "अचश्च" इति परिभाषया ये इत्यस्य अचः एव प्लुतः भवति।

उदाहरणम् - ये३ यजामहे।

सूत्रार्थसमन्वयः - श्रौतयज्ञकर्मणि येन मन्त्रेण आहुतिः दीयते सः मन्त्रः याज्या इत्युच्यते। यज्ञकर्मणि याज्यामन्त्रस्य आदौ "ये३ यजामहे" इति वाक्यं प्रयुज्यते। अतः यज्ञकर्मणि प्रयुक्तत्वात् ये इत्यस्य एकारस्य प्रकृतसूत्रेण प्लुतः विधीयते।

विशेषः- यदि यज्ञकर्म न भवति तर्हि ये इत्यस्याचः प्लुतः प्रकृतसूत्रेण न भवति। यथा स्वाध्यायकाले "ये यजामह इति पञ्चाक्षरम्" इत्यादौ ये इत्यस्य प्लुतः न भवति।

२४.२) अग्नीत्प्रेषणे परस्य च (८.२.९२)

सूत्रार्थः – अग्नीधः प्रेषणे आदेः प्लुतः तस्मात्परस्य च।

सूत्रव्याख्या - विधिसूत्रमिदम्। अनेन सूत्रेण प्लुतत्वं विधीयते। अस्मिन् सूत्रे त्रीणि पदानि सन्ति। अग्नीत्प्रेषणे परस्य च इति सूत्रगतपदच्छेदः। अग्नीत्प्रेषणे इति सप्तम्यन्तं पदम्। अग्नीधः प्रेषणमिति अग्नीत्प्रेषणम्, तस्मिन् अग्नीत्प्रेषणे इति। परस्य इति षष्ठ्यन्तं पदम्। च इति अव्ययपदम्। ब्रूहिप्रेष्यश्रौषड्वौषडावहानामादेः इति सूत्रात् आदेः इति पदम्, ये यज्ञकर्मणि इति सूत्रात् यज्ञकर्मणि इति पदं च अनुवर्तते। वाक्यस्य टेः प्लुत उदात्तः इति सूत्रात् प्लुतः इति पदम् अनुवर्तते तेन अचश्च इति परिभाषया अचः इत्यपि लभ्यते। ततश्च सूत्रार्थो भवति अग्नीधः प्रेषणे आदेः अचः प्लुतत्वं तस्मात् परस्य च अचः अपि प्लुतत्वं भवति यज्ञकर्मणि इति। आग्नीध्राख्यं ऋत्विजम् प्रति अध्वर्योः प्रेषणे अर्थात् तं प्रति उपदेशवाक्ये निर्देशवाक्ये वा आदेः अचः, तस्मात् (आदिभूतात्) परस्य च अचः प्लुतत्वं भवति इति सरलार्थः।

उदाहरणम् – ओ३श्रा३वय इति।

सूत्रार्थसमन्वयः - ओ३श्रा३वय इति आग्नीध्राख्यं ऋत्विजं प्रति अध्वर्योः निर्देशवाक्यम्। तेनात्र आदेः अचः ओकारस्य ततः परस्य अचः आकारस्य (श्रा-इत्यस्य) च अनेन सूत्रेण प्लुतत्वम्।

विशेषः- सूत्रे प्रेषणे इति उक्तम् अस्ति अतः तद्भिन्ने व्यापारे प्लुतः न भवति। यथा - अग्नीदग्नीन् विहर, इत्यादौ बहिस्तृणोहि इत्यादौ च न प्लुतत्वम्। यज्ञकर्मणि इत्युक्तत्वात् यज्ञकर्मभिन्नस्थले न प्लुतत्वम्, तेन आश्रावयास्तश्रौषट् इत्यादौ न प्लुतत्वम्।

२४.३) विभाषा पृष्टप्रतिवचने हेः॥ (८.२.९३)

सूत्रार्थः – पृष्टप्रतिवचने हेः विभाषा प्लुतो भवति।

सूत्रव्याख्या - विधिसूत्रमिदम्। अनेन सूत्रेण प्लुतत्वं विधीयते। अस्मिन् सूत्रे त्रीणि पदानि सन्ति। विभाषा इति प्रथमैकवचनान्तम्, पृष्टप्रतिवचने इति सप्तम्येकवचनान्तम्, हेः इति षष्ठ्येकवचनान्तं पदम्। विभाषा इत्यस्य विकल्पेन इत्यर्थः। पृष्टप्रतिवचने इत्यत्र पृष्टस्य प्रतिवचनम् आख्यानं पृष्टप्रतिवचनं, तस्मिन् इति षष्ठीतत्पुरुषः। वाक्यस्य टेः प्लुत उदात्तः इति सूत्रात् प्लुतः इति पदमनुवर्तते, तेन अचश्च इति परिभाषया अचः इति लभ्यते। एवं सूत्रार्थो भवति पृष्टस्य प्रतिवचने (प्रत्युत्तरे) हेः अचः विकल्पेन प्लुतः भवति इति।

उदाहरणम् – अस्य उदाहरणमस्ति अकार्षं हि३, अकार्षं हि इति च।

सूत्रार्थसमन्वयः - अकार्षीः कटम् इति पृष्टस्य प्रश्नस्य उत्तरं भवति अकार्षं हि इति। तेन अत्र प्रत्युत्तरवाक्ये हेः अचः इकारस्य विकल्पेन प्लुतत्वम्। एवं प्लुतत्वपक्षे अकार्षं हि३ इति तदभावपक्षे अकार्षं हि इति भवति।

विशेषः- सूत्रे पृष्टप्रतिवचने इत्युक्तत्वात् प्रत्युत्तरभिन्नवाक्ये हेः अचः प्लुतत्वं न भवति, तेन कटं करिष्यति हि इत्यादौ सामान्यवाक्ये हेः न प्लुतत्वम्। सूत्रे हेः इत्युक्तत्वात् करोमि ननु इत्यादौ प्रत्युत्तरत्वे अपि हिभिन्नस्य ननु-इत्यादेः प्लुतत्वं न।

२४.४) आम्रेडितं भर्त्सने।॥ (८.२.९५)

सूत्रार्थः – भर्त्सने आम्रेडितं प्लुतं भवति।

सूत्रव्याख्या - विधिसूत्रमिदम्। अनेन सूत्रेण प्लुतत्वं विधीयते। अस्मिन् सूत्रे द्वे पदे स्तः। आम्रेडितम् इति प्रथमैकवचनान्तम्, भर्त्सने इति सप्तम्येकवचनान्तं च। वाक्यस्य टेः प्लुत उदात्तः इत्यस्मात् सूत्रात् टेः इति प्लुतः इति च अनुवर्तते, प्लुत इति आम्रेडितम् इत्यस्य विशेषणम्, तेन तस्य नपुंसकत्वम्। प्लुतः इत्यस्य अनुवर्तनाद् अचश्च इति परिभाषया अचः इत्यपि लभ्यते। भर्त्सनं नाम अपकारशब्दैः भयोत्पादनम्। तस्य परमाम्रेडितम् इति सूत्रेण उक्तम् आम्रेडितमत्र न गृहीतम्। अत्र आम्रडितपदं पूर्वस्य परस्य च द्वयोः उपलक्षणार्थम्। अमरकोषे अपि उक्तम् आम्रेडितं द्विस्त्रिरुक्तम् इति। तेन सूत्रार्थो भवति भर्त्सने अर्थे आम्रेडितस्य (पूर्वस्य परस्य च) टेः अचः प्लुतत्वं भवति इति।

उदाहरणम् – अस्य उदाहरणं भवति दस्यो३ दस्यो३ घातयिष्यामि त्वाम् इति।

सूत्रार्थसमन्वयः - अत्र वाक्यादेरामन्त्रितस्यासूयासम्मतिकोपकुत्स्नभर्त्सनेषु इत्यनेन भर्त्सने अर्थे गम्यमाने दस्युशब्दस्य द्वित्वं भवति। तयोः द्वयोः दस्यो इत्यनयोः टेः अचः ओकारस्य प्रकृतसूत्रेण प्लुतत्वम्।

२४.५) अङ्गयुक्तं तिङाकाङ्क्षम्॥ (८.२.९६)

सूत्रार्थः - छन्दसि भर्त्सने अङ्गयुक्तं तिङाकाङ्क्षम् प्लुतम् भवति।

सूत्रव्याख्या - विधिसूत्रमिदम्। अनेन सूत्रेण प्लुतत्वं विधीयते। अस्मिन् सूत्रे द्वे पदे स्तः। अङ्गयुक्तम् इति प्रथमान्तं, तिङाकाङ्क्षम् इत्यपि प्रथमान्तं पदम्। अङ्गयुक्तम् इत्यस्य अङ्गशब्देन युक्तम् इत्यर्थः। तिङाकाङ्क्षमित्यस्य साकाङ्क्षं तिङ् इत्यर्थः। अस्मिन् सूत्रे आम्रेडितं भर्त्सने इत्यस्मात् सूत्रात् भर्त्सने इति, वाक्यस्य टेः प्लुत उदात्तः इत्यस्मात् टेः, प्लुतः इति पदद्वयं च अनुवर्तते। प्लुत इत्यनुवर्तनाद् अचश्च इति परिभाषया अचः इत्यपि योज्यते। तेन सूत्रार्थो भवति अङ्गशब्देन युक्तं साकाङ्क्षं यत् तिङ् तस्य टेः अचः प्लुतत्वं भवति।

उदाहरणम् – अस्य उदाहरणं भवति अङ्ग कूज३ इदानीं ज्ञास्यसि जाल्म इति।

सूत्रार्थसमन्वयः - अङ्ग कूज३ इदानीं ज्ञास्यसि जाल्म इत्यस्य मूर्ख इदानीमेव अपशब्दकथनस्य फलं प्राप्स्यतीत्यर्थः। अत्र अङ्ग इति रोषपूर्वकं सम्बोधनम्। अत्र कूज इति इदानीं ज्ञास्यसि जाल्म इति वाक्यस्थितम् ज्ञास्यसि इति तिङन्तम् आकाङ्क्षति अतः कूज इति साकाङ्क्षं तिङ्। इदं च अङ्गशब्देन युक्तम् अस्ति। एवं च अत्र गम्यमानं भर्त्सनम् किञ्च अङ्गशब्देन युक्तं साकाङ्क्षं तिङ् कूज इति वर्तते, तेन प्रकृतसूत्रेण कूज इत्यस्य टेः अचः प्लुतत्वं सम्भवति।

विशेषः- सूत्रे साकाङ्क्षतिङः ग्रहणात् अङ्ग देवदत्त मिथ्या वदसि इत्यादौ भर्त्सनार्थस्य सत्त्वेऽपि अङ्गशब्देन युक्तं देवदत्त इति सुबन्तं वर्तते इत्यतः न प्लुतत्वम्।

अङ्ग पच इत्यादौ पच इति तिङन्तं स्वार्थप्रतिपादने न कमपि अपेक्षते, अतः अत्र आकाङ्क्षायाः असत्त्वात् न प्रकृतसूत्रेण प्लुतत्वम्।

भर्त्सने गम्यमाने एव साकाङ्क्षतिङः प्लुतत्वम् भवति, तेन अङ्गाधीष्व भक्तं तव दास्यामि (पठ अन्नं तुभ्यं दास्यामि) इत्यादौ अधीष्व इति तिङन्तस्य दास्यामि इति तिङन्तेन सह सम्बन्धत्वेऽपि भर्त्सनार्थस्य अभावात् न प्लुतत्वम्।

२४.६) पूर्वं तु भाषायाम्॥ (८.२.९८)

सूत्रार्थः - विचार्यमाणानां टेः प्लुतः भवति।

सूत्रव्याख्या - विधिसूत्रमिदम्। अनेन सूत्रेण प्लुतत्वं विधीयते। अस्मिन् सूत्रे त्रीणि पदानि सन्ति। पूर्वमिति प्रथमैकवचनान्तम्, तु इति अव्ययपदम्, भाषायामिति सप्तम्येकवचनान्तम्। विचार्यमाणानाम् इति सूत्राद् विचार्यमाणानामिति पदम् अनुवर्तते। वाक्यस्य टेः प्लुत उदात्तः इति सम्पूर्णम् अपि सूत्रमत्र अनुवर्तते। प्लुतः इत्यनुवर्तनाद् अचश्च इति परिभाषया अचः इत्यपि लभ्यते। भाषायामित्यस्य लौकिकसंस्कृते इत्यर्थः। पूर्वमित्यस्य पूर्वं विद्यमानमित्यर्थः। तेन लौकिकसंस्कृते विचार्यमाणानां (वाक्यानाम्) मध्ये पूर्वं विद्यमानं यद् वाक्यं तस्य टेः अचः प्लुतो भवति, तस्य च उदात्तस्वरो भवति इति सूत्राशयः। अत्र वाक्ये यस्य पूर्वं प्रयोगः तस्यैव पूर्वत्वम् बोद्धव्यम्।

उदाहरणम् – अहिर्नु३ रज्जुर्नु।

सूत्रार्थसमन्वयः – अस्य उदाहरणवाक्यस्य सर्पो वा रज्जुर्वा इत्यर्थः। नु इति वितर्केऽर्थे अव्ययम्। अत्र विचार्यमाणानां वाक्यानां मध्ये पूर्वं विद्यमानं यद् अहिर्नु इति वाक्यं तस्य टेः अचः उकारस्य अनेन सूत्रेण प्लुतत्वम् उदात्तस्वरश्च भवति।

विशेषः- अस्मात् सूत्रात् पूर्वं सूत्रम् अस्ति विचार्यमाणानाम् इति, तेन अपि इदमेव कार्यं भवति। परन्तु अस्मिन् सूत्रे भाषायाम् इति पदं वर्तते, तेन पूर्वं सूत्रं वैदिकप्रयोगविषये प्रवर्तते इदञ्च लौकिकप्रयोगविषये प्रवर्तते इति ज्ञेयम्।

२४.७) अनुदात्तं प्रश्नान्ताभिपूजितयोः॥ (८.२.१००)

सूत्रार्थः - अनुदात्तः प्लुतः स्यात्।

सूत्रव्याख्या - विधिसूत्रमिदम्। अनेन सूत्रेण प्लुतस्य अनुदात्तस्वरविधानं भवति। अस्मिन् सूत्रे द्वे पदे स्तः। अनुदात्तमिति प्रथमैकवचनान्तं विधायकं पदम्। प्रश्नान्ताभिपूजितयोः इति सप्तमीद्विवचनान्तं पदम्। वाक्यस्य टेः प्लुत उदात्तः इत्यस्मात् वाक्यस्य टेः प्लुतः इति पदत्रयम् अनुवर्तते। प्लुतस्य अनुवर्तनाद् अचश्च इति परिभाषया अचः इत्यपि लभ्यते। प्रश्नशब्दस्य प्रश्नार्थं वाक्यम् इत्यर्थः, तस्य अन्तः प्रश्नान्तः इति षष्ठीतत्पुरुषः प्रश्नार्थवाक्यस्य अन्तिमः इत्यर्थः। अभिपूजितशब्दस्य सत्कार इत्यर्थः। तेन सूत्रार्थो भवति प्रश्नार्थकस्य सत्कारार्थकस्य च वाक्यस्य अन्तस्य टेः प्लुतस्य अचः

अनुदात्तस्वरो भवति। तत्र प्रश्नार्थे वाक्ये अनन्त्यस्यापि प्रश्नाख्यानयोः इत्यनेन सूत्रेण विहितस्य प्लुतस्य, अभिपूजितार्थे वाक्ये च दूराद्धूते च इत्यादिना विहितस्य प्लुतस्य च अनेन सूत्रेण अनुदात्तस्वरो भवति।

उदाहरणम् – अत्र प्रश्नान्तस्य उदाहरणं भवति अग्निभूत३इ इति पट३उ इति च। अभिपूजितस्य उदाहरणं भवति शोभनः खल्वति माणवक३ इति।

सूत्रार्थसमन्वयः - अत्र अगमः पूर्वं ग्रामान् अग्निभूते। इति प्रश्नार्थकं वाक्यम्। तस्य अन्तस्य टेः एकारस्य (अ इ) अनन्त्यस्य अकारस्य अनन्त्यस्यापि प्रश्नाख्यानयोः इत्यनेन प्लुतत्वम्। वाक्यस्य टेः प्लुत उदात्तः इत्यनेन प्लुतस्य उदात्तत्वे प्राप्ते, तस्य प्रकृतसूत्रेण अनुदात्तस्वरः, तेन अग्निभूत३इ इति रूपम्। पटो इत्यत्र टेः उकारस्य अनन्त्यस्य अकारस्य अनन्त्यस्यापि प्रश्नाख्यानयोः इत्यनेन प्लुतत्वम्। वाक्यस्य टेः प्लुत उदात्तः इत्यनेन प्लुतस्य उदात्तत्वे प्राप्ते, तस्य प्रकृतसूत्रेण अनुदात्तस्वरः, तेन पट३उ इति रूपम्। शोभनः खल्विति माणवकः इत्यत्र अन्तस्य टेः अचः अकारस्य दूराद्धूते च इत्यनेन प्लुतस्वरः। तस्य प्रकृतसूत्रेण अनुदात्तस्वरः, तेन माणवक३ इति रूपम्।

२४.८) उपरिस्विदासीदिति च॥ (८.२.१०२)

सूत्रार्थः - उपरिस्विदासीत् इत्येतस्य टेः प्लुतोऽनुदात्तः स्यात्।

सूत्रव्याख्या - विधिसूत्रमिदम्। अनेन सूत्रेण अनुदात्तस्वरः विधीयते। अस्मिन् सूत्रे त्रीणि पदानि सन्ति। उपरिस्विदासीत् इति च इति पदच्छेदः। पदत्रयमपि अत्र अव्ययम्। अस्मिन् सूत्रे अनुदात्तं प्रश्नान्ताभिपूजितयोः इत्यतः अनुदात्तम् इति पदम्, वाक्यस्य टेः प्लुत उदात्तः इत्यस्मात् सूत्रात् वाक्यस्य टेः प्लुतः इति पदत्रयम् अनुवर्तते। तेन सूत्रार्थो भवति उपरिस्विदासीत् इति वाक्यस्य टेः प्लुतस्य अनुदात्तस्वरो भवति।

उदाहरणम् – अस्य उदाहरणं भवति उपरिस्विदासी३द् इति।

सूत्रार्थसमन्वयः - 'अधः स्विदासी ३ दुपरिस्विदासी ३ त्' इति ऋग्वेदस्य मन्त्रः। अत्र अधः स्विदासी ३ द् इति एकं वाक्यम् उपरिस्विदासी ३ द् इत्यपरं वाक्यम्। सृष्टेः पूर्वं प्रकृतिः स्रष्टुः उपरि आसीद् अथवा अधः इत्येवम् अत्र वाक्यद्वये विचारोऽस्ति। तेन विचार्यमाणानाम् इति सूत्रेण उभयत्र वाक्ये टेः अचः प्लुतस्वरः उदात्तत्वं च भवति। एवम् उपरिस्विदासी३द् इत्यत्र प्लुतस्य अचः उदात्तत्वं बाधित्वा प्रकृतसूत्रेण अनुदात्तस्वरो भवति।

विशेषः- सूत्रे उपरिस्विदासी३द् इति ग्रहणाद् अधः स्विदासी३द् इत्यत्र प्लुतस्य न अनुदात्तस्वरः।

२४.९) अनन्त्यस्यापि प्रश्नाख्यानयोः।(८.२.१०५)

सूत्रार्थः- अनन्त्यस्य अन्त्यस्य च पदस्य टेः स्वरितः प्लुतः प्रश्नाख्यानयोः।

सूत्रव्याख्या- विधिसूत्रमिदम्। अनेन सूत्रेण प्लुतत्वम् विधीयते। अस्मिन् सूत्रे त्रीणि पदानि सन्ति। अनन्त्यस्य इति षष्ठ्येकवचनान्तम्, अपि इति अव्ययम्, प्रश्नाख्यानयोः इति

सप्तमीद्विवचनान्तम्। अन्ते भवः अन्त्यः, न अन्त्यः अनन्त्यः, तस्य अनन्त्यस्य इति नञ्तत्पुरुषः अन्त्यभिन्नस्य इत्यर्थः। प्रश्नश्च आख्यानञ्च प्रश्नाख्याने, तयोः प्रश्नाख्यानयोः इति इतरेतरयोगद्वन्द्वसमासः। अस्मिन् सूत्रे स्वरितमाम्रेडितेऽसूया-सम्मति-कोप-कुत्सनेषु इति सूत्राद् स्वरितम् इति पदम्, वाक्यस्य टेः प्लुत उदात्तः इति सूत्राद् च वाक्यस्य टेः प्लुत इति एतानि पदानि अनुवर्तन्ते। प्लुतग्रहणाद् अचश्च इति परिभाषया अचः इत्यपि लभ्यते। पदस्य इत्यपि अनुवर्तते। अनन्त्यस्यापि इत्यत्र अपि शब्दः अस्ति, तेन अन्त्यस्यापि ग्रहणम्। एवं यथा अन्त्यस्य तथा अनन्त्यस्यापि इति बोद्धव्यम्। आख्यानं नाम उत्तरं वस्तुस्थितिवर्णनं वा। अस्य सूत्रस्य सरलार्थो भवति प्रश्ने उत्तरे (वस्तुस्थितिवर्णने वा) च अन्त्यस्य अनन्त्यस्यापि च पदस्य टेः अचः स्वरितस्वरः प्लुतश्च भवति।

उदाहरणम्- अस्य उदाहरणं भवति **प्रश्ने-** अगमः३ पूर्वा३न् ग्रामा३न् इति, **आख्याने-** अगम३म् पूर्वा३न् ग्रामा३न् इति।

सूत्रार्थसमन्वयः- अगम:३ पूर्वा३न् ग्रामा३न् इत्यस्य तावत् त्वम् पूर्वस्थितान् ग्रामान् गतवान् वा इत्यर्थः। इदं प्रश्नार्थकं वाक्यम् अतः अत्र अन्त्यस्य पदस्य अन्त्यभिन्नानां च पदानां टेः अचः प्रकृतसूत्रेण स्वरितस्वरः प्लुतश्च इति। अगम३म् पूर्वा३न् ग्रामा३न् इत्यस्य तावत् आम् , गतवान् पूर्वस्थितान् ग्रामान् इत्यर्थः, इदं तु उत्तरार्थकं वाक्यम्। अतः अत्रापि पूर्ववद् अन्त्यस्य पदस्य अन्त्यभिन्नानां च पदानां टेः अचः प्रकृतसूत्रेण स्वरितस्वरः प्लुतश्च इति।

विशेषः- यद्यपि प्रश्नार्थवाक्यस्य अन्त्यस्य पदस्य टेः अचः अनुदात्तं प्रश्नान्ताभिपूजितयोः इत्यनेन अनुदात्तस्वरः प्लुतश्च भवति तथापि प्रकृतसूत्रे अपिशब्देन अन्त्यस्यापि ग्रहणाद् प्रश्नार्थकवाक्यस्य अन्त्यस्य प्रकृतसूत्रेण स्वरितस्वरोऽपि भवति। एवञ्च विकल्पेन प्रश्नान्तस्य स्वरितस्वरः अनुदात्तस्वरश्च भवति।

२४.१०) दीर्घादटि समानपादे॥ (८.३.९)

सूत्रार्थः - दीर्घान्नकारस्य रुर्वा स्यादटि तौ चेन्नाटौ एकपादस्थौ स्याताम्।

सूत्रव्याख्या - विधिसूत्रमिदम्। अनेन सूत्रेण नकारस्य रुः विधीयते। अस्मिन् सूत्रे त्रीणि पदानि सन्ति। दीर्घात् इति पञ्चम्यन्तं, अटि इति सप्तम्यन्तं, समानपदे इति सप्तम्यन्तं पदम्। अट् इति प्रत्याहारः। समानश्च असौ पादश्च समानपादः, तस्मिन् इति कर्मधारयसमासः इति समानपादे एकपादे इत्यर्थः। अत्र उभयथर्क्षु इत्यस्माद् उभयथा ऋक्षु इति पदद्वयम्, नश्छव्यप्रशान् इत्यस्मात् नः इति षष्ठ्यन्तम्, मतुवसो रु संबुद्धौ छन्दसि इत्यस्मात् रुः इति प्रथमान्तं, तयोर्य्वावचि संहितायाम् इत्यस्मात् संहितायाम् इत्येतानि पदानि अनुवर्तन्ते। उभयथा इत्यस्य उभयम् (एकस्मिन् पक्षे रुः अपरस्मिन् पक्षे नकारः) इत्यर्थः। ऋक्षु इत्यस्य ऋङ्मन्त्रेषु इत्यर्थः। तेन अस्य सरलार्थो भवति ऋङ्मन्त्रेषु एकस्मिन् पादे दीर्घात् वर्णाद् नकारस्य रुः विकल्पेन भवति अट्प्रत्याहारस्थवर्णे परतः संहितायां विषये इति।

उदाहरणम् – अस्य उदाहरणं भवति देवाँ अच्छा सुमती (ऋ.४.१.२) इति, महाँ इन्द्रो य ओजसा (ऋ.८.६.१) इति च।

सूत्रार्थसमन्वयः – रुत्वपक्षे देवान् अच्छा इति स्थिते, महान् इन्द्रो इति स्थिते अत्र ऋङ्मन्त्रे एकस्मिन् पादे एव दीर्घात् नकारस्य सत्त्वात् ततः परम् अट्प्रत्याहारस्थवर्णस्य विद्यमानत्वाद् संहितायां विषये नकारस्य रुत्वे आतोऽटि नित्यम् इत्यनेन रोः पूर्वस्य अचः अनुनासिके भोभगोअघोअपूर्वस्य योऽशि इत्यनेन रोः यादेशे लोपः शाकल्यस्य इत्यनेन तस्य लोपे देवाँ अच्छा इति महाँ इन्द्रो इति रूपद्वयं सिद्ध्यति। अस्य सूत्रस्य वैकल्पिकत्वाद् रुत्वाभावपक्षे संयोगे देवानच्छ इति महानिन्द्रो इत्यपि भविष्यति।

विशेषः- वाक्ये संहिता (सन्धिः) वक्तुः इच्छाधीना भवति। अतः वाक्ये संहितायाः विवक्षायामेव सन्धिः। अविवक्षायाम् तु संहिताभावः। एवम् अस्य सूत्रस्य वैकल्पिकत्वं तु सिध्यति एव, तथापि पूर्वस्मात् सूत्रात् उभयथा इति पदस्य ग्रहणेन वैकल्पिकत्वविधानात् क्वचित् रुत्वं न भवति इति, तेन आदित्यान् याचिषामहे इत्यत्र सूत्रोक्तानां समेषां विषयाणां सत्त्वेऽपि नकारस्य रुत्वं न भवति।

पाठगतप्रश्नाः-१

१. ये इत्यस्य कदा प्लुतस्वरः भवति।
२. अग्नीधः प्रेषणे इत्यत्र प्रेषणे शब्दस्य कः अर्थः।
३. हिशब्दस्य कदा प्लुतस्वरः भवति।
४. कस्मिन् अर्थे आम्रेडितस्य प्लुतस्वरः भवति।
५. केन शब्देन युक्तं तिङन्तं प्लवते।
६. भाषायाम् इति शब्दस्य कोऽर्थः।
७. अभिपूजितशब्दस्य कः अर्थः।
८. अनन्त्यस्यान्त्यस्यापि प्रश्नाख्यानयोः इत्यत्र अपिशब्देन कस्य ग्रहणम्।
९. वेदे दीर्घात् नकारस्य रुविधायकं सूत्रं किम्।

२४.११) आतोऽटि नित्यम्॥ (८.३.३)

सूत्रार्थः - अटि परतो रोः पूर्वस्य आतः स्थाने नित्यम् अनुनासिकः।

सूत्रव्याख्या - विधिसूत्रमिदम्। अनेन सूत्रेण अनुनासिकस्वरः विधीयते। अस्मिन् सूत्रे त्रीणि पदानि सन्ति। आतः इति षष्ठ्यन्तम्। अटि इति सप्तम्यन्तम्। नित्यमिति प्रथमान्तम्। आतः इत्यस्य आकारस्य इत्यर्थः। अट् इति प्रत्याहारः। अत्रानुनासिकः पूर्वस्य तु वा इत्यस्मात् सूत्रात् अनुनासिकः पूर्वस्य इति पदद्वयम्, मतुवसो रु संबुद्धौ छन्दसि इत्यस्मात् रुः इति, तयोर्य्वावचि संहितायाम् इत्यस्मात् संहितायाम् इत्येतानि पदानि अनुवर्तन्ते। तेन सूत्रार्थो भवति रोः पूर्वस्य आकारस्य नित्यम् अनुनासिकस्वरो भवति यदि परे अट्प्रत्याहारस्थवर्णः तिष्ठति।

उदाहरणम् – अस्य उदाहरणं भवति महाँ इन्द्रो य ओजसा इति।

सूत्रार्थसमन्वयः - महान् इन्द्रः इत्यत्र दीर्घादटि समानपादे इत्यनेन नकारस्य रुत्वं भवति। ततः महारु इन्द्रः इति स्थिते प्रकृतसूत्रेण रोः पूर्वस्य आकारस्य नित्यम् अनुनासिकस्वरो भवति परे अट्प्रत्याहारस्थवर्णस्य इकारस्य सत्त्वात्। ततः भोभगोअघोअपूर्वस्य योऽशि इत्यनेन रोः यादेशे लोपः शाकल्यस्य इत्यनेन यकारस्य लोपे महाँ इन्द्रः इति सिद्ध्यति।

विशेषः- अत्रानुनासिकः पूर्वस्य तु वा इत्यनेन रोः पूर्वस्य आकारस्य विकल्पेन अनुनासिकस्वरः प्राप्नोति परन्तु तं बाधित्वा प्रकृतसूत्रेण रोः पूर्वस्य नित्यम् अनुनासिकस्वरः भवति। परन्तु तथापि तैतिरीयशाखाध्यायिनः महान् इन्द्रः इत्यत्र अनुस्वारं (महां) पठन्ति। अत्र अनुस्वारः कथं सिद्ध्यति इति चेत् व्यत्ययो बहुलम् इति सूत्रेण व्यत्ययेन भवति इति। एवम् अत्र पुनः विकल्पविधानाद् प्रकृतसूत्रेण नित्यम् अनुनासिकविधानं व्यर्थं भवति इति प्रकृतसूत्रप्रयोजनम् चिन्त्यम् अस्ति।

२४.१२) छन्दसि वाऽप्राम्रेडितयोः॥ (८.३.४९)

सूत्रार्थः - विसर्गस्य सो वा स्यात् कुप्वोः प्रशब्दम् आम्रेडितं च वर्जयित्वा।

सूत्रव्याख्या - विधिसूत्रमिदम्। अनेन सूत्रेण विसर्गस्य सकारः भवति। अस्मिन् सूत्रे त्रीणि पदानि सन्ति छन्दसि वा अप्राम्रेडितयोः इति। छन्दसि इति सप्तम्येकवचनान्तं, वा इति अव्ययपदम्, अप्राम्रेडितयोः इति सप्तमीद्विवचनान्तं पदम्। छन्दसि इत्यस्य वेदे इत्यर्थः। प्रश्च आम्रेडितञ्च प्राम्रेडिते, न प्राम्रेडिते अप्राम्रेडिते, तयोः अप्राम्रेडितयोः। प्रशब्दम् आम्रेडितशब्दं च त्यक्त्वा इत्यर्थः। आम्रेडितशब्दस्य द्विरुक्तिरित्यर्थः। अस्मिन् सूत्रे विसर्जनीयस्य सः इति सम्पूर्णमपि सूत्रम् अनुवर्तते। विसर्जनीयशब्दस्य विसर्ग इत्यर्थः। क पौ च कुपू तयोः कुप्वोः इति सप्तम्यन्तम् कुप्वोः इति, तयोर्य्वावचि संहितायाम् इत्यस्मात् संहितायाम् इति एतानि पदानि अनुवर्तन्ते। कुशब्दस्य कवर्गः इत्यर्थः, पुशब्दस्य पवर्गः इत्यर्थः। वेदे विसर्गस्य स्थाने सकारः विकल्पेन भवति कवर्गः पवर्गः वा यदि परे तिष्ठति परन्तु यदि परं प्रशब्दः आम्रेडितम् वा तिष्ठति तर्हि न भवति इति सूत्रस्याशयः।

उदाहरणम् – अस्य उदाहरणं भवति अग्ने त्रातर्ऋतस्कविः इति गिरिर्नि विश्वतस्पृथुः इति च।

सूत्रार्थसमन्वयः – त्रातः कविः इत्यत्र कवर्गस्थवर्णः परं विद्यते तेन विसर्गस्य विकल्पेन सकारे त्रातस्कविः इति सिद्ध्यति। एवं विश्वतः पृथुः इत्यत्र पवर्गस्थवर्णः परं विद्यते तेन विसर्गस्य विकल्पेन सकारे विश्वतस्पृथुः इति सिध्यति।

विशेषः- अनेन सूत्रेण विकल्पेन सकारो भवति तेन क्वचित् विसर्गस्य स्थाने सकारः प्रयुज्यते क्वचित् च विसर्ग एव प्रयुज्यते। एवं वसुनः पूर्व्यस्पतिः (ऋग्वेदः१०.४८.१) इत्यत्र यद्यपि पवर्गस्थवर्णः परं विद्यते। किन्तु यदि प्रशब्दः परं स्यात् तर्हि विसर्गस्य सकारो न भवति यथा अग्निः प्र विद्वान् (अथर्ववेदः ५.२६.१) इत्यत्र प्रशब्दे परे विसर्गस्य न सकारः। आम्रेडितं यदि परं स्यात् तदा अपि विसर्गस्य सकारो न भवति यथा पुरुषः पुरुषः परि इत्यत्र द्वितीयपुरुषशब्दस्य तस्य परमाम्रेडितम् इत्यनेन आम्रेडितसंज्ञा भवति। सः आम्रेडितसंज्ञकः पुरुषशब्दः परे अस्ति इत्यतः विसर्गस्य न सकारः।

२४.१३) कःकरत्करतिकृधिकृतेष्वनदितेः॥ (८.३.५०)

सूत्रार्थः - विसर्गस्य सः स्यात्।

सूत्रव्याख्या - विधिसूत्रमिदम्। अनेन सूत्रेण विसर्गस्य सकारो भवति। अस्मिन् सूत्रे द्वे पदे स्तः। कःकरत्करतिकृधिकृतेषु इति सप्तमीबहुवचनान्तं, अनदितेः इति षष्ठ्येकवचनान्तं पदम्। कस् च करत् च करतिश्च कृधिश्च कृतश्च कःकरत्करतिकृधिकृताः तेषु कःकरत्करतिकृधिकृतेषु इति। न अदिति अनदितिः तस्य अनदितेः इति। अदितिशब्दस्य विसर्गं विहाय इत्यर्थः। छन्दसि वाप्राम्रेडितयोः इत्यस्मात् सूत्रात् छन्दसि इति अनुवर्तते। छन्दसि इत्यस्य वेदे इत्यर्थः। अत्र विसर्जनीयस्य सः इति सम्पूर्णमपि सूत्रम् अनुवर्तते। विसर्जनीयशब्दस्य विसर्ग इत्यर्थः। तयोर्य्वावचि संहितायाम् इत्यस्मात् संहितायाम् इति पदञ्च अनुवर्तते। तेन सूत्रार्थो भवति वेदे संहितायां विषये विसर्गस्य सकारो भवति कःकरत्करतिकृधिकृतेषु परेषु अदितिशब्दस्य विसर्गस्य सकारो न भवति।

उदाहरणम् – अस्य उदाहरणानि भवन्ति 'प्रदिवो अपस्कः', 'यथा नो वस्यसस्करत्', 'सुपेशसस्करोति', 'उरुणस्कृधि', 'सोमं न चारु मघवत्सु नस्कृतम्' इत्येतानि।

सूत्रार्थसमन्वयः - कृधातोः लुङि प्रथमैकवचने वेदे कः करत् च इति रूपद्वयं भवति, लटि करति, लोटि कृधि इति रूपम्। कृधातोः क्तप्रत्यये विभक्तौ कृतमिति रूपम्। एवम् अत्र अपः कः इति, वस्यसः करत् इति, सुपेशसः करति, उरुणः कृधि इति, नः कृतम् इति स्थिते प्रकृतसूत्रेण सर्वत्र विसर्गस्य सकारः।

विशेषः- प्रकृतसूत्रे अनदितेः इत्युक्तत्वात् अदितिशब्दाद् आगतस्य विसर्गस्य कःकरत्करतिकृधिकृतेषु परेषु अपि सकारादेशः न भवति। तेन यथा नो अदितिः करत् इत्यादिमन्त्रे अदितिः करत् इत्यत्र विसर्गस्य न सकारः।

२४.१४) पातौ च बहुलम्॥ (८.३.५२)

सूत्रार्थः - छन्दसि पञ्चम्याः विसर्गस्य सः स्यादुपरिभवार्थे परिशब्दे परतः।

सूत्रव्याख्या - विधिसूत्रमिदम्। अनेन सूत्रेण विसर्गस्य सकारः भवति। अस्मिन् सूत्रे त्रीणि पदानि सन्ति। पातौ इति सप्तम्यन्तम्। च इति अव्ययपदम्। बहुलम् इति प्रथमान्तं पदम्। अस्मिन् सूत्रे पञ्चम्याः परावध्यर्थे इत्यस्मात् सूत्रात् पञ्चम्याः इति पदम्, छन्दसि वाऽम्रेडितयोः इत्यस्मात् सूत्रात् छन्दसि इति पदम्, सोऽपदादौ इत्यस्मात् सः इति प्रथमान्तम् पदम्, तयोर्य्वावचि संहितायाम् इत्यस्मात् सूत्रात् संहितायाम् इति सप्तम्यन्तम् पदम् च इति अनुवर्तन्ते। विसर्जनीयस्य इत्यपि अनुवर्तते। तस्य च विसर्गस्य इत्यर्थः। छन्दसि इत्यस्य वेदे इत्यर्थः। संहिताशब्दस्य च सन्धिः इत्यर्थः। तेन सूत्रर्थो भवति वेदे संहिताविषये पञ्चम्याः विसर्गस्य सकारो भवति यदि परे पाधातुः तिष्ठति इति।

उदाहरणम् – सूर्यो नो दिवस्पातु इति।

सूत्रार्थसमन्वयः - सूर्यो नो दिवस्पातु (ऋ.१०.१५८.१) इत्यस्मिन् मन्त्रांशे दिवः इति पञ्चम्यन्तम्, ततः परं पाधातोः रूपं पातु इति विद्यते, तस्मात् पञ्चम्यन्तस्य दिवः विसर्गस्य सकारे दिवस्पातु इति रूपम्।

विशेषः- सूत्रे बहुलम् इति पदं विद्यते। बहुलग्रहणं सर्वोपाधिवर्जनार्थम्। तस्मात् क्वचिद् अन्यद् अपि भवति। तेन कदाचित् पाधातुः परे सत्यपि पञ्चम्याः विसर्गस्य सकारो न भवति। अस्य उदाहरणं परिषदः पातु इति, अत्र पञ्चम्याः विसर्गस्य न सकारः।

२४.१५) षष्ठ्याः पतिपुत्रपृष्ठपारपदपयस्पोषेषु॥ (८.३.५३)

सूत्रार्थः – छन्दसि पतिपुत्रपृष्ठपारपदपयस्पोषेषु षष्ठ्याः विसर्जनीयस्य सः भवति।

सूत्रव्याख्या - विधिसूत्रमिदम्। अनेन सूत्रेण विसर्गस्य सः भवति। अस्मिन् सूत्रे द्वे पदे स्तः। षष्ठ्याः इति षष्ठ्येकवचनान्तं, पतिपुत्रपृष्ठपारपदपयस्पोषेषु इति सप्तमीबहुवचनान्तं पदम्। पतिश्च पुत्रश्च पृष्ठश्च पारश्च पदञ्च पयः च पोषश्च इति पतिपुत्रपृष्ठपारपदपयस्पोषाः, तेषु पतिपुत्रपृष्ठपारपदपयस्पोषेषु इति, एतेषु परेषु इत्यर्थः। अस्मिन् सूत्रे छन्दसि वाऽम्रेडितयोः इत्यस्मात् सूत्रात् छन्दसि इति पदम्, सोऽपदादौ इत्यस्मात् सः इति प्रथमान्तम् पदम्, तयोर्य्वावचि संहितायाम् इत्यस्मात् सूत्रात् संहितायाम् इति सप्तम्यन्तम् पदम् च इति अनुवर्तन्ते। विसर्जनीयस्य इत्यपि अनुवर्तते। तस्य च विसर्गस्य इत्यर्थः। छन्दसि इत्यस्य वेदे इत्यर्थः। संहिताशब्दस्य च सन्धिः इत्यर्थः। तेन सूत्रार्थो भवति वेदे संहिताविषये षष्ठ्याः विसर्गस्य सकारो भवति यदि परे पतिपुत्रपृष्ठपारपदपयस्पोषाणाम् कोऽपि तिष्ठति इति।

उदाहरणम् – अस्य उदाहरणानि भवन्ति - वाचस्पतिं विश्वकर्माणम् (ऋ.१०.८१.७), दिवस्पुत्राय सूर्याय (ऋ.१०.१७.१), दिवस्पृष्ठं भन्दमानः (ऋ.३.२.१२), तमसस्पारमस्य (ऋ.१.९२.६), परिवीत इळस्पदे (ऋ.१.१२८.१), दिवस्पयो दिधिषाणाः (ऋ.१०.११४.१), रायस्पोषं यजमानेषु धनम् (ऋ.८.४९.७) इत्येतानि।

सूत्रार्थसमन्वयः - वाचस्पतिम् इत्यत्र वाचः पतिम् इति दशायाम् अत्र पतिशब्दः परं विद्यते तेन पूर्वस्य वाचः इति षष्ठ्यन्तस्य विसर्गस्य अनेन सूत्रेण सकारः। दिवस्पुत्राय इत्यत्र दिवः पुत्राय इति दशायाम् अत्र पुत्रशब्दः परं विद्यते तेन पूर्वस्य दिवः इति षष्ठ्यन्तस्य विसर्गस्य अनेन सूत्रेण सकारः। दिवस्पृष्ठम् इत्यत्र दिवः पृष्ठम् इति दशायाम् अत्र पृष्ठशब्दः परं विद्यते तेन पूर्वस्य दिवः इति षष्ठ्यन्तस्य विसर्गस्य अनेन सूत्रेण सकारः। तमसस्पारम् इत्यत्र तमसः पारम् इति दशायाम् अत्र पारशब्दः परं विद्यते तेन पूर्वस्य तमसः इति षष्ठ्यन्तस्य विसर्गस्य अनेन सूत्रेण सकारः। परिवीत इळस्पदे इति मन्त्रांशस्य इळस्पदे इत्यत्र इडः पदे इति दशायाम् अत्र पदशब्दः परं विद्यते तेन पूर्वस्य इळः इति षष्ठ्यन्तस्य विसर्गस्य अनेन सूत्रेण सकारः। दिवस्पयः इत्यत्र दिवः पयः इति दशायाम् अत्र पयस्-शब्दः परं विद्यते तेन पूर्वस्य दिव इति षष्ठ्यन्तस्य विसर्गस्य अनेन सूत्रेण सकारः। रायस्पोषम् इत्यत्र रायः पोषम् इति दशायाम् अत्र पोषशब्दः परं विद्यते तेन पूर्वस्य रायः इति षष्ठ्यन्तस्य विसर्गस्य अनेन सूत्रेण सकारः।

विशेषः- प्रकृतसूत्रे षष्ठ्यन्तस्य एव विसर्गस्य सकारः विहितः। तेन मनुः पुत्रेभ्यः दायम् इत्यत्र मनुशब्दः प्रथमान्तः, तेन पुत्रशब्दस्य परे विद्यमानत्वेऽपि पूर्वस्य विसर्गस्य न सः।

२४.१६) इडाया वा॥ (८.३.५४)

सूत्रार्थः – छन्दसि पतिपुत्रपृष्ठपारपदपयस्पोषेषु षष्ठ्याः विसर्जनीयस्य वा सः भवति।

सूत्रव्याख्या - विधिसूत्रमिदम्। अनेन सूत्रेण विसर्गस्य सः विधीयते। अस्मिन् सूत्रे द्वे पदे स्तः। इडायाः इति षष्ठ्यन्तम्, वा इति अव्ययपदम्। अस्मिन् सूत्रे छन्दसि वाऽम्रेडितयोः इत्यस्मात् सूत्रात् छन्दसि इति पदम्, सोऽपदादौ इत्यस्मात् सः इति प्रथमान्तम् पदम्, तयोर्य्वावचि संहितायाम् इत्यस्मात् सूत्रात् संहितायाम् इति सप्तम्यन्तम् पदम्, षष्ठ्याः पतिपुत्रपृष्ठपारपदपयस्पोषेषु इत्यस्मात् पतिपुत्रपृष्ठपारपदपयस्पोषेषु इति सप्तम्यन्तम् पदम् चेति अनुवर्तन्ते। विसर्जनीयस्य इत्यपि अनुवर्तते। तस्य च विसर्गस्य इत्यर्थः। छन्दसि इत्यस्य वेदे इत्यर्थः। संहिताशब्दस्य च सन्धिः इत्यर्थः। तेन सूत्रार्थो भवति वेदे संहितायाः विषये षष्ठ्यन्तस्य इडाशब्दस्य विसर्गस्य सकारो वा भवति यदि परे पतिपुत्रपृष्ठपारपदपयस्पोषाणाम् कोऽपि तिष्ठति इति।

उदाहरणम् - अस्य उदाहरणं भवति इळायास्पुत्रः, इळायाः पुत्रः, इळायास्पदे, इळायाः पदे इति।

सूत्रार्थसमन्वयः – इढायाः पुत्रः, इढायाः पदे इत्यत्र पुत्रशब्दः पदशब्दश्च विद्यते तेन प्रकृतसूत्रेण षष्ठ्यन्तस्य इढाशब्दस्य विसर्गस्य विकल्पेन सकारः। एवं सकारपक्षे इळायास्पुत्रः, इळायास्पदे इति सकाराभावपक्षे च इळायाः पुत्रः, इळायाः पदे इत्येतानि रूपाणि भवन्ति।

वार्तिकम्- निसस्तपतावनासेवने।

वार्तिकार्थः- निसः सकारस्य मूर्धन्यः स्यात्।

वार्तिकव्यख्या- निसः इति षष्ठ्यन्तं, तपतौ इति सप्तम्यन्तम्, अनासेवने इति सप्तम्यन्तं पदम्। तपति इति श्तिपा धातुनिर्देशः। आसेवनं नाम पुनः पुनः करणम्। न आसेवनम् अनासेवनम् तस्मिन् इति अनासेवने, पुनः पुनः अकरणे इत्यर्थः। एवं पुनः पुनः अकरणे अर्थे निसः सकारस्य मूर्धन्यादेशः भवति यदि परं तप्-धातुः स्याद् इति।

उदहरणम्- अस्य उदाहरणं भवति निष्टप्तं रक्षो निष्टप्ता अरातयः इति।

वार्तिकार्थसमन्वयः- निष्टप्तम् इत्यत्र निस् इत्यस्मात् परं तप्धातोः क्तान्तं रूपम् अस्ति। तेन निसः सकारस्य प्रकृतवार्तिकेन मूर्धन्यादेशे ष्टुना ष्टुः इत्यनेन तकारस्य टकारे निष्टप्तम् इति रूपम्।

विशेषः- वार्तिके अनासेवने इत्युक्तत्वात् पुनः पुनः करणे अर्थे निसः सस्य मूर्धन्यादेशः न भवति। यथा निस्तपति (पुनः पुनः तपति) इत्यत्र निसः सस्य न मूर्धन्यादेशः।

२४.१७) सनोतेरनः॥ (८.३.१०८)

सूत्रार्थः – अनन्तस्य सनोतेः सस्य षः स्यात्।

सूत्रव्याख्या - विधिसूत्रमिदम्। अनेन सूत्रेण सकारः विधीयते। अस्मिन् सूत्रे द्वे पदे स्तः। सनोतेः इति षष्ठ्यन्तम्। अनः इत्यपि तथा। अविद्यमानो नकारो यस्य स अन्, तस्य अनः। अत्र सनोतेः इति श्तिपा धातुनिर्देशः। अस्मिन् सूत्रे पूर्वपदात् इत्यस्मात् सूत्रात् पूर्वपदात्, स्तुतस्तोमयोश्छन्दसि इत्यस्मात् सूत्रात् छन्दसि, सहेः साडः सः इत्यस्मात् सः इति षष्ठ्यन्तम्, इण्कोः इत्यस्माद् इण्कोः, तयोर्य्वावचि संहितायाम् इत्यस्मात् संहितायाम् इत्येतानि पदानि अनुवर्तन्ते। नुम्विसर्जनीयशर्व्यवायेऽपि इति अपदान्तस्य मूर्धन्यः इति च सूत्रे अनुवर्तेते। अनः इति सनोतेः विशेषणं तेन तदन्तविधिना अन्नन्तस्य सनोतेः इति लभ्यते। तेन सूत्रार्थो भवति वेदे संहितायाः विषये पूर्वपदाद् इण्कोः उत्तरस्य अन्नन्तस्य सनोतेः धातोः सस्य मूर्धन्यः भवति नुम्-विसर्जनीय-शर् इत्येतेषां व्यवधानेऽपि।

उदाहरणम् - अस्य उदाहरणं भवति गोषा इन्द्रो नृषा असि (ऋ.९-२-१०) इति।

सूत्रार्थसमन्वयः - गाः सनोतीति गोषाः। अत्र गोकर्मकात् सन्धातोः जनसनखनक्रमगमो विट् इत्यनेन विट्प्रत्यये, विट्प्रत्ययस्य सर्वस्य लोपे सनः नकारस्य विड्वनोरनुनासिकस्यात् इत्यनेन आकारे गो सा इति स्थिते प्रकृतसूत्रेण इणः (गकारोत्तरात् ओकारात्) परस्य अन्नन्तस्य सन्धातोः सकारस्य मूर्धन्यादेशः। तेन गोषा इति रूपम्। एवं नरं सनोति इति विग्रहे नृपूर्वकाद् सन्धातोः पूर्ववद् विट्प्रत्यये सर्वस्य लोपे नकारस्य आकारे नृ सा इति स्थिते प्रकृतसूत्रेण इणः ऋकारात् उत्तरस्य अन्नन्तस्य सनोतेः सस्य मूर्धन्यादेशः, तेन नृषा इति सिध्यति।

विशेषः- सूत्रेऽस्मिन् अनः इत्यनेन अनकारान्तः सन्धातु गृहीतः। गोसनिः इत्यत्र सस्य न षः। अत्र गां सनोति इति विग्रहे गोपूर्वकात् सन्धातोः छन्दसि वनसनरक्षिमथाम् इत्यनेन इन्प्रत्यये (सन् इन्) गो सनि इति स्थिते नान्तस्य सनः सत्त्वात् न प्रकृतसूत्रेण अत्र सस्य मूर्धन्यादेशः।

२४.१८) छन्दस्यृदवग्रहात्॥ (८.४.२६)

सूत्रार्थः - ऋकारान्तादवग्रहात्परस्य नस्य णः।

सूत्रव्याख्या - विधिसूत्रमिदम्। अनेन सूत्रेण नस्य णकारो भवति। अस्मिन् सूत्रे द्वे पदे स्तः। छन्दसि इति सप्तम्येकवचनान्तम्, अवग्रहात् इति पञ्चम्येकवचनान्तं पदम्। छन्दसि इत्यस्य वेदे इत्यर्थः। ऋदवग्रहाद् इत्यस्य ऋच्च असौ अवग्रहश्च ऋदवग्रहः, तस्माद् इत्यर्थः। अवच्छिद्य विच्छिद्य पठ्यते इति अवग्रहः। अत्र अवग्रहो नाम विच्छिद्य पठनयोग्यत्वम्। एवं संहितापाठे विच्छिद्य पठनयोग्यता तिष्ठति पदपाठे च विच्छिद्य पठनयोग्यता न तिष्ठति। अस्मिन् सूत्रे रषाभ्यां नो णः इत्यस्मात् नो णः इति पदद्वयम्, तयोर्य्वावचि संहितायाम् इत्यस्मात् संहितायाम् इति पदम्, पूर्वपदात् संज्ञायामगः इत्यस्मात् पूर्वपदात् इति एतानि पदानि अत्र अनुवर्तन्ते। अट्कुप्वाङ्नुम्व्यवायेऽपि इति सम्पूर्णमपि सूत्रमत्र अनुवर्तते। तेन सूत्रार्थो भवति वेदे संहितायाः विषये अवग्रहविषय-ऋकारान्तपूर्वपदाद् उत्तरस्य नस्य णः भवति अट्-कु-पु-आङ्-नुम्-इति एतेषां व्यवधानेऽपि इति।

उदाहरणम् - अस्य उदाहरणं भवति नृमणाः, पितृयाणम् इति।

सूत्रार्थसमन्वयः - नृषु मनो यस्य इति विग्रहे नृमणाः इति। अत्र संहितापाठे पूर्वपदम् नृ इति ऋकारान्तम् अस्ति तस्य च विच्छिद्य पठनयोग्यता अपि वर्तते। तेन अवग्रहाद् ऋकारान्तात्परस्य नस्य

पवर्गेण व्यवधानेऽपि प्रकृतसूत्रेण णकारः सिध्यति। एवं पितृणां यानम् इति विग्रहे पितृयाणम् इति। अत्र संहितापाठे पूर्वपदं पितृ इति ऋकारान्तम् अस्ति। तस्य च विच्छिद्य पठनयोग्यता अपि वर्तते तेन अवग्रहाद् ऋकारान्तात्परस्य नस्य अट्प्रत्याहारस्थवर्णेन व्यवधानेऽपि प्रकृतसूत्रेण णकारः सिध्यति। नृऽमनाः इति पदपाठे तु विच्छिद्य पठनयोग्यता नास्ति अतः ऋकारान्तात् नृ-इत्यस्मात्परस्य नस्य न णकारः। एवं पितृऽयानम् इत्यत्रापि पूर्ववद् विच्छिद्य पठनयोग्यता नास्ति अतः ऋकारान्तात् पितृ-इत्यस्मात्परस्य नस्य न णकारः।

पाठगतप्रश्नाः-२

१०. वेदे रोः पूर्वस्यातः स्थाने नित्यमनुनासिकः केन सूत्रेण भवति।
११. अप्राम्रेडितयोः इत्यस्य विग्रहं प्रदर्शयत।
१२. प्रदिवो अपस्कः इत्यत्र केन सूत्रेण विसर्गस्य सकारः।
१३. अनदितेः इत्यत्र का विभक्तिः।
१४. पञ्चम्याः विसर्गस्य पातौ परे सकारः केन सूत्रेण भवति।
१५. पतिपुत्रपृष्ठपारपदपयस्पोषेषु इत्यस्य विग्रहवाक्यं दर्शयत।
१६. इडायाः वा इत्यनेन कस्य विसर्गस्य सकारः भवति।
१७. वेदे अन्नन्तस्य सनोतेः सस्य षविधायकं सूत्रं किम्।
१८. वेदे ऋकारान्तादवग्रहात्परस्य नस्य णविधायकं सूत्रं किम्।

पाठसारः

अस्मिन् पाठे अष्टाध्याय्याः अष्टमाध्यायस्य द्वितीयपादे तृतीयपादे च विद्यमानानां विशेषसूत्राणां व्याख्यानम् विहितम्। प्लुतस्वरः, विसर्गस्य सत्वविधानं, नकारस्य णकारविधानं, सस्य षत्वविधानम् इत्येते मुख्याः केचित् विषयाः अत्र प्रस्तुताः। कथं प्लुतस्वरः विधीयते इति ये यज्ञकर्मणि, अग्नीत्प्रेषणे परस्य च, विभाषा पृष्टप्रतिवचने हेः, आम्रेडितं भर्त्सने, अङ्गयुक्तं तिङाकाङ्क्षम्, पूर्वं तु भाषायाम्, अनुदात्तं प्रश्नान्ताभिपूजितयोः, उपरिस्विदासीदिति च, अनन्त्यस्यापि प्रश्नाख्यानयोः इति एतैः सूत्रैः आलोचितमस्ति। विसर्गस्य कथं सत्वविधानम् भवति इति छन्दसि वाऽप्राम्रेडितयोः, कः करत्करतिकृधिकृतेष्वनदितेः, पातौ च बहुलम्, षष्ठ्याः पतिपुत्रपृष्ठपारपदपयस्पोषेषु, इडाया वा इति एतैः सूत्रैः आलोचितानि। सनोतेरनः इति सूत्रेण निसस्तपतावनासेवने इति वार्तिकेन च षत्वविधानं प्रदर्शितम्। कथं रकारस्य विकल्पेन रुत्वम् भवति इति तद् प्रदर्शितं दीर्घादटि समानपादे इति सूत्रेण। आतोऽटि नित्यम् इति सूत्रेण अटि परयोः रोः पूर्वस्य आतः स्थाने कथं नित्यम् अनुनासिकस्वरः भवति तदपि

आलोचितम्। कथञ्च छन्दस्यृदवग्रहात् इति सूत्रं नकारस्य णत्वं विदधाति तदेतत् सर्वम् अस्मिन् पाठे आलोचितम् अस्ति।

पाठान्तप्रश्नाः

१. अग्नीत्प्रेषणे परस्य च इति सूत्रं व्याख्यात।
२. विभाषा पृष्टप्रतिवचने हेः इति सूत्रं व्याख्यात।
३. आम्रेडितं भर्त्सने इति सूत्रं व्याख्यात।
४. दीर्घादटि समानपदे इति सूत्रं व्याख्यात।
५. पातौ च बहुलम् इति सूत्रं व्याख्यात।
६. निसस्तपतावनासेवने इति वार्तिकं व्याख्यात।
७. सनोतेरनः इति सूत्रं व्याख्यात।

पाठगतप्रश्नानाम् उत्तराणि

उत्तरकूटः-१

१. यज्ञकर्मणि
२. उपदेशवाक्ये निर्देशवाक्ये वा इत्यर्थः।
३. पृष्टप्रतिवचने।
४. भर्त्सने अर्थे।
५. अङ्गशब्देन युक्तं तिङन्तम्।
६. लौकिकसंस्कृते इत्यर्थः।
७. सत्कार इत्यर्थः।
८. अन्त्यस्य ग्रहणम्।
९. दीर्घादटि समानपदे इति।

उत्तरकूटः-२

१०. आतोऽटि नित्यम् इत्यनेन।
११. प्रश्च आम्रेडितञ्च प्राम्रेडिते, नप्राम्रेडिते अप्राम्रेडिते, तयोः अप्राम्रेडितयोः इति।
१२. कःकरत्करतिकृधिकृतेश्वनदितेः इत्यनेन।
१३. षष्ठीविभक्तिः।
१४. पातौ च बहुलम्।

१५. पतिश्च पुत्रश्च पृष्ठश्च पारश्च पदञ्च पयः च पोषश्च इति पतिपुत्रपृष्ठपारपदपयस्पोषाः, तेषु पतिपुत्रपृष्ठपारपदपयस्पोषेषु इति

१६. षष्ठ्याः।

१७. सनोतेरनः।

१८. छन्दस्यृदवग्रहात् इति।

इति चतुर्विंशः पाठः